"सृक्काद्भग्नाश्मयी देवी मरुमाला लता लघुः।
समुद्रान्ता वधूः कोटिवर्षालङ्कोपिकेत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

लघुः, त्रि, ( लङ्घ + कुः। नलोपश्च। ) अगुरुः। ( यथा,—
"तृणादपि लघुस्तूलस्तूलादपि च भिक्षुकः।
न नीतो वायुना कस्मादर्थप्रार्थनशङ्कया ॥"
इत्युद्भटः ॥ )
मनोज्ञः। ( इष्टः। इत्यमरः ॥ यथा, रघुः। ११। १२।
"नाम्भसां कमलशोभिनां तथा
शाखिनाञ्च न परिश्रमच्छिदाम्।
दर्शनेन लघुना यथा तयोः
प्रीतिमापुरुभयोस्तपस्विनः ॥" )
निःसारः। इति मेदिनी। घे, ५ ॥ ( यथा, रघुः। १२। ६६।
"श्रुत्वा रामः प्रियोदन्तं मेने तत्सङ्गमोत्सुकः।
महार्णवपरिक्षेपं लङ्कायाः परिखालघुम् ॥" )
ह्रस्वः। इति हेमचन्द्रः ॥ * ॥ व्याकरणोक्त-लघुसंज्ञा यथा। ह्रस्वो लघुः दीर्घो गुरुरित्युच्चारणवशाज्ज्ञायते। तथा संयोगे सति ह्रस्वोऽपि गुरुर्गुरुमतोऽनृच्छ इति वर्ज्जनाच्च। इति दुर्गसिंहकृतकलापवृत्तिः ॥ * ॥ छन्दःशास्त्रोक्तं लघुलक्षणं यथा,—
"मस्त्रिगुरुस्त्रिलघुश्च नकारो
भादिगुरुः पुनरादिलघुर्यः।
जो गुरुमध्यगतो रलमध्यः
सोऽन्तगुरुः कथितोऽन्तलघुस्तः ॥
गुरुरेको गकारस्तु लकारो लघुरेककः ॥"
इति छन्दोमञ्जरी ॥

लघुकायः, पुं, ( लघुः कायो यस्य। ) छागः। इति त्रिकाण्डशेषः ॥ क्षुद्रशरीरश्च ॥

लघुकाश्मर्य्यः, पुं, ( लघुः काश्मर्य्यः। ) कट्फल-वृक्षः। इति राजनिर्घण्टः ॥

लघुखट्विका, स्त्री, ( लघुः खट्विका। ) क्षुद्रखट्वा। तत्पर्य्यायः। आसन्दी २। इति हारावली। २०६ ॥

लघुगणः, पुं, ( लघुर्गणः। ) अश्विनीपुष्यहस्तनक्षत्राणि। यथा,—
"उग्रः पूर्व्वमघान्तका ध्रुवगणश्चोत्युत्तराणि स्वभू-
र्व्वातादित्यहरित्रयं चरगणः पुष्याश्विहस्ता लघुः ॥"
इति दीपिका ॥

लघुगर्गः, पुं, ( लघुर्गर्ग इव। ) त्रिकण्टकमत्स्यः। इति हारावली। १६० ॥

लघुचिर्भिटा, स्त्री, ( लघुश्चिर्भिटा। ) म्हगेर्व्वारु। इति राजनिर्घण्टः ॥

लघुजङ्गलः, पुं, लावकपक्षी। इति त्रिकाण्डशेषः ॥

लघुदन्ती, स्त्री, ( लघुः क्षुद्रा दन्ती। ) क्षुद्रदन्तीवृक्षः। यथा,—
"लघ्वी दन्ती विशल्या च स्यादुडम्बरपर्ण्यपि।
तथैरण्डफला शीघ्रा श्येनघण्टा घुणप्रिया।
वराहाङ्गी च कथिता निकुम्भश्च मकूलकः ॥"
अस्या गुणाः।
"दन्तीद्वयं सरं पाके रसे च कटु दीपनम्।
गुदाङ्कुराश्मशूलास्रकण्डूकुष्ठविदाहनुत् ॥
तीक्ष्णोष्णं हन्ति पित्तास्रकफशोथोदरक्रिमीन् ॥"
इति भावप्रकाशः ॥
तत्फलगुणाः।
"क्षुद्रदन्तीफलन्तु स्यान्मधुरं रसपाकयोः।
शीतलं स्रष्टविण्मूत्रं गलशोथकफापहम् ॥"
इति भावप्रकाशः ॥

लघुदुन्दुभिः, पुं, ( लघुर्दुन्दुभिः। ) दगड़वाद्यम्। इति शब्दरत्नावली ॥

लघुद्राक्षा, स्त्री, ( लघुः क्षुद्रा द्राक्षा। ) काकली-द्राक्षा। इति राजनिर्घण्टः ॥

लघुनाम, [ न् ] क्ली, ( लघु लघुवर्णयुक्तं नाम यस्य। ) अगुरु। इति शब्दचन्द्रिका ॥

लघुपञ्चमूलं, क्ली, ( लघु क्षुद्रं पञ्चमूलम्। ) क्षुद्र-पञ्चमूलपाचनम्। तत्तु शालपर्णीपृश्निपर्णी-बृहतीकण्टकारीगोक्षुरसंयुक्तम्। यथा,—
"शालपर्णी पृश्निपर्णी वार्त्ताकी कण्टकारिका।
गोक्षुरः पञ्चभिश्चैतैः कनिष्ठं पञ्चमूलकम् ॥"
अस्य गुणाः।
"पञ्चमूलं लघु स्वादु बल्यं पित्तानिलापहम्।
नात्युष्णं बृंहणं ग्राहि ज्वरश्वासाश्मरीप्रणुत् ॥"
इति भावप्रकाशः ॥

लघुपत्रकः, पुं, ( लघूनि पत्राणि यस्य। कप्। ) रोचनी। शुक्लारोचनी इति ख्यातः। इति शब्दचन्द्रिका ॥

लघुपत्री, स्त्री, ( लघूनि पत्राणि यस्याः। ङीष्। ) अश्वत्थोवृक्षः। इति राजनिर्घण्टः ॥

लघुपिच्छिलः, पुं, ( लघुः पिच्छिलः। ) भूकर्व्वु-दारकः। इति राजनिर्घण्टः ॥

लघुपुष्पः, पुं, ( लघूनि क्षुद्राणि पुष्पाणि यस्य। ) भूमिकदम्बः। इति राजनिर्घण्टः ॥ ( भूमि-कदम्बशब्देऽस्य विशेषो ज्ञेयः ॥ )

लघुबदरः, पुं, ( लघुः क्षुद्रो बदरः। ) क्षुद्रकोलिः। तत्पर्य्यायः। सूक्ष्मफलः २ बहुकरः ३ सूक्ष्म-पत्रः ४ दुःस्पर्शः ५ मधुरः ६ दरहारः ७ शिखिप्रियः ८। इति राजनिर्घण्टः ॥ अस्य फलगुणाः।
"कर्कन्धुः क्षुद्रबदरं कथितं पूर्व्वसूरिभिः।
अम्लं स्यात् क्षुद्रबदरं कषायं कथितं मनाक् ॥
स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम्।
शुष्कं भेद्यग्निकृत् सर्व्वं लघु तृष्णाक्लमा-
स्रजित् ॥"
इति भावप्रकाशः ॥
अस्य पक्वफलगुणाः। मधुराम्लत्वम्। कफवात-नाशित्वम्। रुच्यत्वम्। स्निग्धत्वम्। जन्तुकारकत्वम्। ईषत्पित्तार्त्तिदाहशोषघ्नत्वञ्च। इति राजनिर्घण्टः ॥

लघुबदरी, स्त्री, ( लघुः क्षुद्रा बदरी। ) भूब-दरी। इति राजनिर्घण्टः ॥

लघुब्राह्मी, स्त्री, ( लघुः क्षुद्रा ब्राह्मी। ) क्षुद्र-ब्राह्मी। तत्पर्य्यायः। जलोद्भवा २ सूक्ष्मपत्रा ३। इति राजनिर्घण्टः ॥

लघुमन्थः, पुं, ( लघुः क्षुद्रो मन्थः ) क्षुद्राग्नि-मन्थः। इति राजनिर्घण्टः ॥

लघुमांसः, पुं, ( लघु स्वल्पं मांसं यस्य। ) तित्तिरि-पक्षी। इति त्रिकाण्डशेषः ॥

लघुमांसी, स्त्री, गन्धमांसी। इति राजनिर्घण्टः ॥

लघुलयं, क्ली, ( लघु शीघ्रं लीयते इति। ली + अच्। ) वीरणमूलम्। इत्यमरः ॥

लघुसदाफला, स्त्री, ( सदा फलं यस्याः सा। लघुः सदाफला। ) लघूडुम्बरिका। इति राजनिर्घण्टः ॥

लघुहस्तः, पुं, ( लघुः क्षिप्रकारी हस्तो यस्य। ) शीघ्रवेधी। इति हेमचन्द्रः। ३। ४३१ ॥ ( वाच्यलिङ्गोऽपि। यथा, कथासरित्सागरे। ४२। १३३।
"स राजपुत्रश्छित्त्वैव रक्षसस्तस्य तच्छिरः।
भूयः खड्गप्रहारेण लघुहस्तो द्विधाकरोत् ॥"
यथा च।
"तत्त्वाधिगतशास्त्रार्थो दृष्टकर्म्मा स्वयं कृती।
लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः ॥
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी विशारदः।
सत्यधर्म्मपरो यश्च स भिषक् पाद उच्यते ॥"
इयि सुश्रुते सूत्रस्थाने ३४ अध्यायः ॥ )

लघुहेमदुग्धा, स्त्री, ( लघुर्हेमदुग्धा। ) लघूडुम्ब-रिका। इति राजनिर्घण्टः ॥

लघूडुम्बरिका, स्त्री, ( लघुः क्षुद्रा उडुम्बरिका। ) क्षुद्रोडुम्बरिका। छोट डुमुर इति भाषा। तत्पर्य्यायः। लघुपत्रफला २ लघुहेमदुग्धा ३ लघुसदाफला ४ सत्वाढ्योडुम्बरिका ५। रस-वीर्य्यविपाकेषु उडुम्बरात् किञ्चिन्न्यूनगुणैयम्। इति राजनिर्घण्टः ॥

लघ्वी, स्त्री, ( लघु + ङीष्। ) लाघवयुक्ता। (यथा,—
"गुर्व्वी पिष्टी खरात्यर्थं लघ्वी सैव विपर्य्ययात्।
शक्तूनामाशु जीर्य्येत मृदुत्वादवलेहिका ॥"
इति वैद्यकचक्रपाणिसंग्रहेऽतीसाराधिकारे ॥)
स्यन्दनप्रभेदः। इति मेदिनी। घे, ५ ॥ पृक्का। इति राजनिर्घण्टः ॥

लङ्का, स्त्री, ( रमन्तेऽस्यामिति। रम् + बाहु-लकात् कः। रस्य लत्वम्। इत्युज्ज्वलः। ३। ४०। ) रक्षःपुरी। ( यथा, नैषधे। ३। ६७।
"चेतो न लङ्कामयते मदीयं
नान्यत्र कुत्रापि च साभिलाषम् ॥" )
ज्योतिःशास्त्रमते सा च पृथिव्या मध्यभागे तिष्ठति। लङ्कोदयात् चरखण्डैः स्वदेशे लग्न-प्रमाणं भवति। यथा,—
"लङ्का कुमध्ये यमकोटिरस्याः
प्राक् पश्चिमे रोमकपत्तनञ्च।